श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमदध्यात्मरामायणे अरण्यकाण्डे जटायु कृतं

# ॥ श्रीरामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामस्तोत्रम् ॥

अगणितगुणमप्रमेयमाद्यं
    सकलजगत्स्थितिसंयमादिहेतुम्।
उपरमपरमं परात्मभूतं
    सततमहं प्रणतोऽस्मि रामचन्द्रम्॥ 1॥

निरवधिसुखमिन्दिराकटाक्ष -
    क्षपितसुरेन्द्रचतुर्मुखादिदुःखम्।
नरवरमनिशं नतोऽस्मि रामं
    वरदमहं वरचापबाणहस्तम्॥ 2॥

त्रिभुवनकमनीयरूपमीड्यं
    रविशतभासुरमीहितप्रदानम्।
शरणदमनिशं सुरागमूले
    कृतनिलयं रघुनन्दनं प्रपद्ये॥ 3॥

भवविपिनदवाग्निनामधेयं
    भवमुखदैवतदैवतं दयाळुम्।
दनुजपतिसहस्रकोटिनाशं
    रवितनयासदृशं हरिं प्रपद्ये॥ 4॥

अविरतभवभावनातिदूरं
    भवविमुखैर्मुनिभिः सदैव दृश्यम्।
भवजलधिसुतारणाङ्घ्रिपोतं
    शरणमहं रघुनन्दनं प्रपद्ये॥ 5॥

गिरिशगिरिसुतामनोनिवासं
गिरिवरधारिणमीहिताभिरामम्।
सुरवरदनुजेन्द्रसेविताङ्घ्रिं
सुरवरदं रघुनायकं प्रपद्ये॥ 6॥

परधनपरदारवर्जितानां
परगुणभूतिषु तुष्टमानसानाम्।
परहितनिरतात्मनां सुसेव्यं
रघुवरमम्बुजलोचनं प्रपद्ये॥ 7॥

स्मितरुचिरविकासिताननाब्ज -
मतिसुलभं सुरराजनीलनीलम्।
सितजलरुहचारुनेत्रशोभं
रघुपतिमीशगुरोर्गुरुं प्रपद्ये॥ 8॥

हरिकमलजशम्भुरूपभेदा -
त्त्वमिह विभासि गुणत्रयानुवृत्तः।
रविरिव जलपूरितोदपात्रे -
ष्वमरपतिस्तुतिपात्रमीशमीडे॥ 9॥

रतिपतिशतकोटिसुन्दराङ्गं
शतपथगोचरभावनाविदूरम्।
यतिपतिहृदये सदा विभातं
रघुपतिमार्तिहरं प्रभुं प्रपद्ये॥ 10॥

इत्येवं स्तुवतस्तस्य प्रसन्नोऽभूद्रघूत्तमः।
उवाच गच्छ भद्रं ते मम विष्णोः परं पदम्॥ 11॥

शृणोति य इदं स्तोत्रं लिखेद्वा नियतः पठेत्।
स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत्॥ 12॥

इति राघवभाषितं तदा
श्रुतवान् हर्षसमाकुलो द्विजः।
रघुनन्दनसाम्यमास्थितः
प्रययौ ब्रह्मसुपूजितं पदम्॥ **13**॥

॥ श्रीरामस्तोत्रं समाप्तम्॥